# Shri Rama Dhama Stava

# શ્રીરામધામસ્તવઃ

## Document Information

Text title : rAmadhAmastavaH

File name : rAmadhAmastavaH.itx

Category : raama, brahmAnanda

Location : doc_raama

Author : tArakabrahmAnandsarasvatI

Transliterated by : N.S.Venkata Subramanian venkatasubr at gmail.com

Proofread by : N.S.Venkata Subramanian, Sunder Hattangadi

Source : Sri Rama Dhama Stava, ed. by P.V.Sivarama Dikshitar, Vighneshvara Venkateshvara trust, Madras 1985

Latest update : February 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીરામધામસ્તવઃ

શ્રીરામચન્દ્રપરબ્રહ્મણે નમઃ ।
ૐ શિવાય ગુરવે નમઃ ।

શ્રીમત્પરમહંસપરિવ્રાજક શ્રીતારકબ્રહ્માનન્દસરસ્વતીવિરચિતઃ
શ્રીરામધામસ્તવઃ ।

યસ્યૈકદન્તસ્ય પરાત્મમૂર્તેઃ
  સઙ્કલ્પમાત્રેણ ભવન્ત્યભીષ્ટાઃ ।
તસ્મૈ નમઃ સોમશિવૈકભક્તિ-
  ધ્યાનૈકનિષ્ઠાય જગદ્ધિતાય ॥

આલિઙ્ગ્ય સીતામખિલાત્મકાં સ્વાં
  સંવિન્મયીં ભાસ્વરવર્ણગાત્રામ્ ।
આનન્દયન્ લોકગુરુઃ પ્રશાન્તઃ
  શ્રીરામચન્દ્રો જયતિ પ્રભુર્નઃ ॥ ૧॥

ઇન્દુકોટિસદૃશાનનદ્યુતિં
  બિમ્બકાન્તિ રુચિરાધરં ગુરુમ્ ।
અઙ્કગામિમિથિલાધિપાત્મજં
  રામચન્દ્રમહમાશ્રયે પરમ્ ॥ ૨॥

ચન્દ્રરશ્મિસદૃશાનનપ્રભં
  સુન્દરં મદનમોહનં પ્રભુમ્ ।
કણ્ઠલમ્બિવરહાર ભૂષણં
  ચિન્તયામિ રઘુનાથવિગ્રહમ્ ॥ ૩॥

ઇન્દ્રવન્દ્યવરપાદપઙ્કજં
  ભક્તહૃદ્ગત તમોરવિં પ્રભુમ્ ।
સન્તતં શરણમાત્મદં પરં

ચિન્તયામિ રઘુનન્દનં ગુરુમ્ ॥ ૪॥

માહાત્મ્યં તસ્ય રામસ્ય યસ્યૈવેદં જગદ્ધશે । var જગદ્ગુરો
સ ગુરુઃ સ પરં બ્રહ્મ સોઽહમસ્મિ સદાશિવઃ ॥ ૫॥

યસ્યાઃ પ્રસાદેન પરોઽવબુદ્ધઃ
સ્વાત્માઽપિ દેવાત્મતયાઽનુભૂતઃ ।
તસ્યૈ નમો વેદશિરોઽવગમ્ય -
બ્રહ્માત્મિકાયૈ શ્રુતિશાસ્ત્રદેવ્યૈ ॥ ૬॥

અઙ્કે યસ્યાઃ શયાનસ્ય મૃત્યુર્નાસ્તીતિ નિશ્ચયઃ ।
શ્રુતિં તાં સન્તતં દેવીં ધ્યાયામિ પરમાત્મના ॥ ૭॥

યસ્ય પ્રસાદેન ભવન્તિ લોકાઃ
ઐશ્વર્યશાસ્ત્રાર્થપરાત્મસિદ્ધાઃ ।
તસ્મૈ નમો વિશ્વહિતે રતાય
વિઘ્નેશ્વરાયાખિલલોકકર્ત્રે ॥ ૮॥

સિદ્ધાસનં પ્રાપ્ય જિતેન્દ્રિયા યે
સત્યાત્મબુદ્ધ્યા સકલં વિલાપ્ય ।
તિષ્ઠન્તિ તત્ત્વે સહજપ્રબોધે
તાન્ રાઘવાનન્દગુરૂન્નમામિ ॥ ૯॥

જન્મકોટિભિરનુષ્ઠિતાખિલ-
ધ્યાનકર્મપરમેશ્વરેક્ષણૈઃ ।
કૃત્સ્નદૃશ્યગતદોષચિન્તનં
બુદ્ધિમાનથ કરોતિ તત્ત્વતઃ ॥ ૧૦॥

યદ્યદલ્પમિહ કિઞ્ચિદીક્ષતે
તત્તદેવ પરિણામિ નશ્વરમ્ ।
નિશ્ચિનોતિ પરિમાર્ગયત્યતો
નિત્યવસ્તુ કિમિહેતિ તત્ત્વતઃ ॥ ૧૧॥

આત્મજ્ઞાનં કારણં વેદવાક્યાત્
શ્રુત્વા બન્ધધ્વંસસાધ્યસ્ય સિદ્ધ્યૈ ।
તચ્ચ જ્ઞાનં વેદવાક્યૈકલભ્યં
મત્વા ધીરો દેશિકેન્દ્રં વરિષ્ઠમ્ ॥ ૧૨॥

ગત્વા શાન્તસ્તસ્ય સેવાં પ્રયુઞ્જં
    તિષ્ઠેત્તસ્મૈ દેશિકો વાક્યજાતમ્ ।
આદિશ્યાદૌ બોધયેત્તત્ત્વમર્થં
    શ્રુત્યા યુક્ત્યા સ્વાનુભૂત્યા તથૈવ ॥ ૧૩॥

(ઇતિ શિક્ષાવલ્લીસઙ્ગ્રહઃ ॥)

(અથાનન્દવલ્લીસઙ્ગ્રહઃ ૨ ।)

શ્રુતં બ્રહ્મ સત્યં યદાદૌ પ્રધાનં
    તદન્તે પુનર્બ્રહ્મવાક્યે મહેશમ્ ।
પરં શ્રૂયતે સેન્દ્રદેવાદ્યવેદ્યં
    સમસ્તં યતો યચ્ચ સર્વં યદન્તમ્ ॥ ૧૪॥ (૧)

યદ્ બ્રહ્માદૌ સૂચિતં બ્રહ્મવાક્યે
    યદ્ વ્યાખ્યાતં સત્યભૂતં ચ ઋગ્ભિઃ ।
પ્રત્યગ્ભૂતં યચ્ચ સર્વસ્ય જન્તોઃ
    તદ્ ભૂમાખ્યં રામધામ પ્રપદ્યે ॥ ૧૫॥ (૨)

યદ્ વિજ્ઞાનાત્સર્વકામાપ્તિરુક્તા
    યસ્માજ્જાતં સૂક્ષ્મભૂતં સમસ્તમ્ ।
યદ્ બોધાર્થં કલ્પિતાઃ પઞ્ચ કોશાઃ
    કોશાતીતં રામધામ પ્રપદ્યે ॥ ૧૬॥ (૩)

સત્તાસ્ફૂર્તી યત્ર વિશ્રાન્તિમેતઃ
    યસ્મિન્નેતદ્ બમ્ભ્રમીતીહ વિશ્વમ્ ।
યચ્ચાદૃશ્યં નીડશૂન્યં ન સઙ્ગિ
    દૃષ્ટે યસ્મિન્ બાધ્યતે ભીતિહેતુઃ ।
યસ્યાજ્ઞાનાદ્ભીતિયુક્તાશ્ચ દેવાઃ
    તદ્ ભૂમાખ્યં રામધામ પ્રપદ્યે ॥ ૧૭॥ (૪)

યસ્યાનન્દસ્યાંશમગ્નાશ્ચ દેવાઃ
    યસ્યાનન્દો ભુજ્યતે વીત તૃષ્ણૈઃ ।
યચ્ચૈતન્યં સર્વભૂતાન્તરસ્થં
    યશ્ચાદિત્યે ગીયતે વેદવાક્યૈઃ ।
યત્ ચૈકત્વં બ્રહ્મણઃ સાક્ષિણોક્તં
    તદ્ ભૂમાખ્યં રામધામ પ્રપદ્યે ॥ ૧૮॥ (૫)

યસ્માચ્છબ્દાઃ શક્તિશૂન્યા નિવૃત્તાઃ
    તદ્ ભૂમાખ્યં રામધામ પ્રપદ્યે ॥ ૧૯॥ (૬)

યત્રામ્નાયો વર્તતેઽમુખ્યવૃત્ત્યા
યચ્ચાગ્રાહ્યં બુદ્ધિવૃત્ત્યાત્મભૂતમ્ ।
યં ચાનન્દં પ્રાપ્ય વિદ્વાનભીતઃ
    તદ્ ભૂમાખ્યં રામધામ પ્રપદ્યે ॥ ૨૦॥ (૭)

યસ્મિન્ જ્ઞાતે પુણ્યપાપે ચ નસ્તો
    યસ્મિન્ દૃષ્ટે વિશ્વમેતદ્ધિ દૃષ્ટમ્ ।
ધ્યેયં યચ્ચ બ્રહ્મવિદ્ભિઃ પ્રશાન્તૈઃ
    તદ્ ભૂમાખ્યં રામધામ પ્રપદ્યે ॥ ૨૧॥ (૮)

ત્યોગો યસ્મૈ વર્તતે વેદવાક્યે
    યદ્ વિજ્ઞાને સાધનં યોગમાહુઃ ।
કેચિત્સાઙ્ખ્યાઃ સાઙ્ખ્યમેવાદ્રિયન્તે
    તદ્ ભૂમાખ્યં રામધામ પ્રપદ્યે ॥ ૨૨॥ (૯)

અન્યો માતા મેયમન્યદ્ધિ યત્ર
    પશ્યન્નેવેત્યેવમુક્તં હિ લક્ષ્મ ।
વિશ્રમ્યાસ્તે યત્ર સત્યે પરસ્મિન્-
    તદ્ ભૂમાખ્યં રામધામ પ્રપદ્યે ॥ ૨૩॥ (૧૦)

યદ્વિજ્ઞાનાત્ સત્યવાદિત્વમેતિ
    યસ્માત્સત્યાજ્જાયતે ચાતિવાદી ।
યસ્મિંલ્લબ્ધે નાસ્તિ કર્તવ્ય બુદ્ધિઃ
    તદ્ ભૂમાખ્યં રામધામ પ્રપદ્યે ॥ ૨૪॥ (૧૧)

કોશજાતમપનીય બુદ્ધિમાન્
    બ્રહ્મરૂપમનવદ્યમીક્ષતે ।
સાદરં સકલમાનશેષિણા
    બ્રહ્મપુચ્છમિતિ વાક્યમાનતઃ ॥ ૨૫॥ (૧૨)

અન્નં બાહ્યં નાહમસ્મીતિ સિદ્ધં
    તદ્વદ્દેહો નાહમસ્મ્યન્નકાર્યમ્ ।
નાહં દેહી તત્ર યચ્ચ પ્રસિદ્ધં

તેષાં સાક્ષી સદ્ઘનોઽહં પરાત્મા ॥ ૨૬॥ (૧૩)

નાહં શ્રોત્રં ત્વક્ ચ ચક્ષુર્ન ચાહં
જિહ્વા ઘ્રાણં પાણિપાદં તથૈવ ।
પાયૂપસ્થં વાઙ્મનઃ પ્રાણવર્ગો
નાહં તેષાં દૃશ્યતુચ્છત્વહેતોઃ ॥ ૨૭॥ (૧૪)

નાહઙ્કારો નાપિ વૃત્તિસ્તદીયા
વિદ્યાવિદ્યે નાપિ સત્વં રજસ્ચ ।
મૂલાઽવિદ્યા નાપિ માયા તથૈવ
તેષામેષામાગમાપાય હેતોઃ ॥ ૨૮॥ (૧૫)

દૃષ્ટે હેયાત્મન્યાત્મનૈવાત્મભૂતે
સર્વં દૃશ્યં બાધ્યતે બ્રહ્મરૂપે ।
યત્ર ત્વસ્યેત્યસ્તિ ચાત્ર પ્રમાણં
સિદ્ધાન્તઃ; સ્યાદાગમાપાયિતૈષામ્ ॥ ૨૯॥ (૧૬)

માયૌ યદ્વન્માયયા વિશ્વમેતત્
સૃષ્ટ્વા સ્વાત્મન્યાત્મનૈવાત્તિ કાલે ।
અણ્ડે પિણ્ડે તદ્વદેવાભિમાની
ખેલત્યાત્મા સંવિદેકસ્વભાવઃ ॥ ૩૦॥ (૧૭)

સ્વપ્નદ્રષ્ટા યદ્વદેવાત્મદોષાત્
સ્વપ્ને સર્વં માનમેયાદિભિન્નમ્ ।
પશ્યન્નાસ્તે તદ્વદેવાત્ર સાક્ષી
તિષ્ઠત્યાત્મા સચ્ચિદેકસ્વભાવઃ ॥ ૩૧॥ (૧૮)

દૃશ્યદૂરગતમાત્મનાઽચ્યુતં
ભાવયન્નખિલમાત્મનિ સ્વકે ।
દૃશ્યવર્ગરહિતઃ પુનર્ભવે
ભૂતભાવિકૃતવર્જિતઃ સ્વયમ્ ॥ ૩૨॥ (૧૯)

પરમપુરુષરૂપે ભૂમ્નિ ભૂતે પરેશે
પરિમિતિમિહ કિઞ્ચિત્ ભાતિ યન્નાસ્તિ તત્ર ।
ઇતિમતિરહમસ્મિ બ્રહ્મ સાક્ષાચ્ચિદાત્મા
વિગલિતમદમાનૌ રાજતે સાર્વભૌમઃ ॥ ૩૩॥ (૨૦)

સમરસપરિપૂર્ણઃ સ્વચ્છચૈતન્યસિન્ધુઃ
    શમદમશરદિન્દુજ્યોતિરાનન્દપૂરઃ ।
જલનિધિશયનશ્રીસ્તુષ્ટિગામ્ભીર્યશીલઃ
    સ્વયમહમિતિ બુદ્ધિર્જાયતે નૈવ દેહી ॥ ૩૪॥ (૨૧)

યત્ર ભાતિ સકલં જગચ્ચલં
    ભિત્તિચિત્રમિવ બુદ્ બુદોપમમ્ ।
સદ્ઘનં સુખચિદાત્મકં પરં
    ભૂમરૂપમહમસ્મિ તત્સદા ॥ ૩૫॥ (૨૨)

પ્રત્યક્તત્ત્વતમોમોહ તાપસન્તાપકૃદ્રવિઃ ।
ઉદેતિ સ્વે સ્વકે નિત્યં સદાનન્દપ્રકાશકઃ ॥ ૩૬॥ (૨૩)

સ્વાત્મગામિ તમોજાલમાપીયાયં વિધુઃ સદા ।
કં વર્ધયન્ વિવેકઃ સ્વે કાશતે કોશદૂરતઃ ॥ ૩૭॥ (૨૪)

સમ્પૂજ્ય સીતાપતિમાવિરાસીત્
    સ્વાનન્દસામ્રાજ્યમનામયં તત્ ।
સર્વજ્ઞતા શાન્તિરસાત્મનિષ્ઠે
    ત્યાગો વિરાગઃ પરમઃ પરાચિ ॥ ૩૮॥ (૨૫)

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્ય શ્રીરામચન્દ્રાશ્રમપૂજ્યપાદશિષ્ય
શ્રીતારકબ્રહ્માનન્દસરસ્વતીવિરચિતા તૈત્તિરીયોપનિષત્સઙ્ગ્રહરૂપા
    શ્રીરામધામસ્તુતિઃ સમ્પૂર્ણા ।

Encoded by N.S.Venkata Subramanian venkatasubr at gmail.com
Proofread by N.S.Venkata Subramanian, Sunder Hattangadi

---

*Shri Rama Dhama Stava*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*